National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(69): 10-12
© 2026 NJHSR
www.sanskritarticle.com

डॉ. मोरा श्रीधरः
संस्कृतविभागः,
उस्मानियाविश्वविद्यालयः,
हैदराबाद

Correspondence:
डॉ. मोरा श्रीधरः
संस्कृतविभागः,
उस्मानियाविश्वविद्यालयः,
हैदराबाद

मत्स्यपुराणे हिमवत्पर्वतवर्णनम्

डॉ. मोरा श्रीधरः

अवतारिका - संस्कृतसाहित्ये पुराणानां प्रमुखस्थानमस्ति । पुराणानि विशिष्टरीत्यां धर्मं प्रतिपादयन्ति । वेदाः प्रभुसम्मिताः। **'सत्यं वद धर्मं चर'** इति वेदाः प्रभुवत् आज्ञापयन्ति। परन्तु, पुराणानि न तथा । तानि मित्रवत् ज्ञानमुपदिशन्ति । **'रामवदाचरति चेत् श्रेयो जायते, रावणवदाचरति चेत् तमिव नश्यति'** इति सदृष्टान्तं मित्रवत् पुराणानि विशदीकुर्वन्ति । अतः पुराणानि मनुष्याणां सुलभतयानुसरणं कर्तुं योग्यानि भवन्ति । तानि सर्वजनसमादरणयोग्यानि भवन्ति यतो हि वैदिकभाषा सुलभतया अवगन्तुं न शक्यते परन्तु, पुराणानां भाषा सुलभग्राह्या भवति ।[1]

मत्स्यपुराणम् - पुराणानि अष्टादशसंख्याकानि सन्ति । तानि -

'मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापकूस्कलिङ्गानि पुराणानि पृथक् पृथक् ॥'

मद्वयम् - मत्स्यपुराणम्, मार्कण्डेयपुराणम्
भद्वयम् - भविष्यपुराणम्, भागवतपुराणम्
ब्रत्रयम् - ब्रह्मपुराणम्, ब्रह्माण्डपुराणम्, ब्रह्मवैवर्तपुराणम्
वचतुष्टयम् - विष्णुपुराणम्, वराहपुराणम्, वामनपुराणम्, वायुपुराणम्
अ - अग्निपुराणम्
ना - नारदपुराणम्
प - पद्मपुराणम्
कू - कूर्मपुराणम्
स्क - स्कान्दपुराणम्
लिं - लिङ्गपुराणम्
ग - गरुडपुराणम्[2]

मत्स्यपुराणम् मत्स्यावतारसम्बद्धमस्ति। अतः इदं मत्स्यपुराणमित्युच्यते। अस्मिन् पुराणे पुराणपञ्चलक्षणानि सन्ति। अत्र अनेके संवादाः क्रियायोगः, व्रतानि, भूलोकवर्णनं, खगोलवर्णनं, त्रिपुरासुरसंहारः, युगधर्माः, इत्यादयः बहुल प्रयोजनकरांशाः प्रोक्ताः ।[3]

अपि चास्मिन् पुराणे तारकासुरसंहारः, नृसिंहावतारः, प्रलयवर्णनं, क्षेत्रमाहात्म्यम्, नदीमाहात्म्यम्, ऋषिगोत्रप्रवरवर्णनम्, सावित्र्युपाख्यानं, राजधर्माः, वामनावतारः, वराहावतारः, क्षीरसागरमथनं, वास्तुशास्त्रं, देवताप्रतिष्ठाविधानम् इत्यादयः विषयाः कथिताः।[4]

संस्कृतसाहित्ये हिमवत्पर्वतप्रस्तावना – संस्कृतमहाकाव्येषु पर्वतवर्णनमवश्यं विद्येत इति आलङ्कारिकाः वदन्ति ।

'प्रातर्मध्याह्नमृगयाशैलर्तूवनसागराः' ।[5]

कालिदासविरचिते कुमारसम्भवमहाकाव्ये दशाधिकश्लोकेषु हिमवन्नगवर्णनमस्ति ।

"अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्वापरौ वारिनिधी विगाह्य स्थितः पृथिव्या इव मानदण्डः।।(1-1)
यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे ।
भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुडुर्धरित्रीम् ।।"(1-2)

(कुमारसम्भवम्)

रघुवंश महाकाव्ये रघोः दिग्विजययात्रावर्णन सन्दर्भे हिमवत्पर्वत-प्रस्तावनास्ति। रघुमहाराजः हिमालयं अश्वसाधनस्सन् आरुरोह। सः अश्वखुरोद्धूतैः गैरिकादिधातुरेणुभिः हिमालयस्य शृङ्गाणि वर्धयन्निव तत्पर्वतमारुरोह। अनेन हिमवत्पर्वते गैरिकादि-धातवस्सन्तीति सः पर्वतः उन्नतश्चेति ज्ञायते।

'ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।
वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ।।'(7) (रघुवंशम् - 4-71)

एवं संस्कृतसाहित्ये अनेकत्र हिमवन्नगप्रस्तावना दृश्यते ।

मत्स्यपुराणे हिमवत्पर्वतवर्णनम्-मत्स्यपुराणे हिमवत्पर्वतवर्णनं समीचीनतयास्ति। तद्वर्णनं किञ्चिदत्र पश्याम: -

'मद्रराजः पुरुरवः महागिरिं हिमवन्तं ददर्श । तस्य हिमवन्नगस्य शृङ्गाणि गगनं चुम्बन्तीवासन् । तस्मिन्नगे अनेके खगाः सञ्चरन्ति स्म । सः पर्वतः ऋषीणां सिद्धिदः आसीत् । सः नगः समन्ततः नदीप्रपातसञ्जातमहाशब्दः, असंश्रितान्यशब्दश्चासीत् । शीतलजलेन सः मनोहरतया आसीत्। तस्मिन् पर्वते विद्यमानाः देवदारुवृक्षाः तस्य नगस्य बाहवः इव, तद्वृक्षेषु सञ्चरन्तः मेघाः तेषां बाहूनामुपरि विराजमानमुत्तरीयकमिवासन्। तस्मिन् पर्वते कुत्रचित् श्वेतमेघाः उष्णीषमिव, चन्द्रसूर्यौ मकुटमिव चासन् । तस्य नगस्य सर्वाङ्गाणि हिमेनानुलिप्तान्यासन् । तस्मिन्नगे क्वचित् गैरिकादिधातवः आसन्। सः नगः पञ्चभिः अङ्गुलीभिः चन्दनेनानुलिप्तः इवासीत् । तत्र निदाघकालेऽपि शीतलतासीत् । तस्मिन् पर्वते कुत्रचित् एकस्मिन्नेव काले क्वचित् सूर्यरश्मिः क्वचिच्च शीतलत्वमासीत्। तत्र अप्सरसां सालक्तकैः चरणैः मुद्रितमासीत्। तत्र भयङ्करगुहारूपमुखैः महत्सलिलं पिबन्निवासीत्। क्वचित् विद्याधरगणाः रमन्ते स्म। कुत्रचित् किन्नरगणाः गायन्ति स्म। तस्मिन् पर्वते कुत्रचित् सन्तानकादिदिव्यपुष्पाणि शोभन्ते स्म। क्वचित् गन्धर्व-भुक्तोज्झिताभिः मृदितपुष्पमालादिभिः मनोहरतया दृश्यते स्म ।

'आलोकयन्नदीं रम्यां तत्समीरगतक्लमः ।
स गच्छन्नेव ददृशे हिमवन्तं महागिरिम् ।। (1)
खमुल्लिखद्भिः बहुभिर्युतं शृङ्गैस्तु पाण्डरैः ।
पक्षिणामथ सञ्चारैः ऋषीणां सिद्धिदं शुभम् ।।' (2)
नदीप्रपातसञ्जातमहाशब्दं समन्ततः ।
असंश्रितान्यशब्दं तु शीततोयं मनोहरम् ।। (3)
देवदारुवनैर्नीतः कृतकृत्यस्स मद्रराट् ।
मेघोत्तरीयकं शैलं ददर्श स नराधिपः ।। (4)
श्वेतमेघकृतोष्णीषं चन्द्रार्कमकुटं क्वचित् ।
हिमानुलिप्तसर्वाङ्गं क्वचिद्धातुविचित्रितम् ।। (5)
चन्दनेनानुलिप्ताङ्गं दत्तपञ्चाङ्गुलं यथा ।
मृदिताभिस्समाकीर्णं गन्धर्वाणां मनोरमम् । (11)

(मत्स्यपुराणम् - 116 अध्यायः) (8)

सः हिमवत्पर्वतः नीलशाद्वलशोभितैः निरुद्धपवनैः प्रदेशैः शोभते स्म । तस्मिन्नगे क्वचित् अत्यन्तरुचिराणि शुभकराणि कुसुमानि सन्ति। तत्र विविधमृगानां गजानां सञ्चारः आसीत् । क्वचित् अद्भुतसिंहनादैः भीताः मृगाः रवान् कुर्वन्ति स्म । अतः सः पर्वतः भयङ्करः दृश्यते स्म । तत्र सिंहनादं श्रुत्वापि गजाः व्याकुलरहिताः आसन् । तस्य पर्वतस्य कुञ्जदेशाः तपद्भिः तापसैः अलङ्कृतः आसीत्। तस्मिन् पर्वते समुत्पन्नैः रत्नैः त्रैलोक्यमपि अलङ्कृतमासीत् । तत्र सर्पाः आसन्। सः पर्वतः अहीनजनैः (महात्मभिः) सेव्यते स्म। सम्पद्युक्तं तत्पर्वतं महात्मानः एव पश्यन्ति स्म । अल्पेन तपसापि तापसाः तत्र सिद्धिमाप्नुवन्ति स्म। तस्य गिरेः दर्शनमात्रेण सर्वपापानि नश्यन्ति स्म। तत्र महाप्रपातसम्पातनदीभिः वेगिताम्बुभिः वायुनीतैः सर्वदा तृप्तीकृतप्रदेशाः आसन् । तद्गिरिशिखरे जलरहितजलदाः आसन् । तैः जलदैः उन्नतशृङ्गः सः नगः हसन्निवासीत् । तस्य नगस्य कानिचन शिखराणि निरन्तरं रविकिरणततान्यासन् । अतः तत्र मनसापि गन्तुमसाध्यमभवत् ।

निरुद्धपवनैर्देशैः नीलशाद्वलमण्डितैः ।। (11)
क्वचिच्च कुसुमैर्युक्तमत्यन्तरुचिरं शुभम् ।
मृगैस्तथानुचरितं दन्तिभिश्च महाद्भुतम् ।। (12)
यत्र सिंहनिनादेन त्रस्तानां भैरवं रवम् ।
दृश्यते न च संश्रान्तं गजानामाकुलं कुलम् ।।(13)
तपद्भिस्तापसैर्यस्य कुञ्जदेशोऽप्यलङ्कृतः।
रत्नैर्यस्य समुत्पन्नैस्त्रैलोक्यं चाप्यलङ्कृतम् ।। (14)
अहीनशरणं नित्यमहीनजनसेवितम् । (15)
नित्यार्कतापविषमैरगम्यैर्मनसा वृतम् ।। (18)

(मत्स्यपुराणम् - अध्यायः -116)(9)

तस्मिन् हिमवत्पर्वते देवदारुवंशादिवृक्षाः आसन् । तस्य नगस्य गुहाः सिंहनादप्रतिध्वनिताः आसन् । तस्य गिरेः महाशृङ्गग्राणि आसन्। तत्र केवलं जलशब्दमेव श्रूयते स्म। तस्य कन्धराणि हिमसंरुद्धान्यासन्।

देवदारू महावृक्षप्लक्षशाखिनिरन्तरैः । (19)
शब्दलभ्याम्बुविषमं हिमसंरुद्धकन्धरम् ।। (20) (10)

(मत्स्यपुराणम्-अध्यायः - 116)

हिमवत्पर्वते बहवो वृक्षाः आसन् । तेषां नामानि कानिचन अधो दीयन्ते ।

1.सालवृक्षाः 2. तमालवृक्षाः 3. शाल्मली वृक्षाः 4. अश्वत्थवृक्षाः 5. शिंशुपावृक्षाः 6. तालवृक्षाः 7. कर्णिकारवृक्षाः 8. न्यग्रोधवृक्षाः 9. शिरीषवृक्षाः 10. श्लेष्मातकवृक्षाः

हिमालयपर्वते माकिं पञ्चाशदुत्तरैकशतसंख्याकाः वृक्षाः आसन् ।

सालैस्तालैस्तमालैश्च कर्णिकारैस्सशाल्मलैः ।
न्यग्रोधैश्च रथाश्वत्थैश्शिरीषैशिंशुपाद्रुमैः ।। (3)
रुद्राक्षैद्रक्षसम्भूतैः सनिम्बैः पुत्रजीवकैः ।
तक्कोलैर्लावकैश्चापि त्वगुद्भुमैः पारिवेतनैः ॥(25)

(मत्स्यपुराणम् - 117 अध्यायः) (11)

हिमालयपर्वते नानालताश्चासन् । तेषु कासांचन लतानां नामान्यधो दीयन्ते -

1. पिप्पलीलताः 2. नागवल्लीलताः 3. मरीचकागुल्मानि

4.पद्मलताः 5. वनमालिकालताः 6. वकुललताः 7.कूश्माण्डलता:

8. अतिमुक्तकलता: 9. वक्रकीलताः

10. कारवेल्ललता:

प्रतानैः पिप्पलीनां च नागवल्लीभिरुत्तमैः ।
मरीचानां तथा गुल्मैः पद्मैश्च वनमालिकैः ।। (26)
नीलोत्पलैः सकर्पूरैः गुञ्जातककलेरुकैः ।
श्रृङ्गाटकसृगालैश्च भरटैश्च स्थलोत्पलैः ।। (45)

(मत्स्यपुराणम् - 117 अध्यायः)(12)

हिमालयगिरौ न केवलं वृक्षलतागुल्मानि आसन् अपि तु तत्र धान्यविशेषाः पुष्पाणि शाकानि फलानि कन्दमूलानि च विविधान्यासन् । सर्वकालसर्वावस्थासु पुष्पादीनि अत्र लभ्यन्ते स्म । एतानि सर्वाणि तपसः प्रयोजनकराणि आसन् ।

जलजैस्स्थलजैः मूलैः फलैः पुष्पैः विशेषतः । (46)
मद्रेश्वरस्स ददृशे तपसोऽर्थोपयोगतः ।। (49)

(मत्स्यपुराणम् - अध्यायः - 117)

हिमवत्पर्वते सुन्दरखगाः आसन् । तेषु केषांचन खगानां नामान्यधो दीयन्ते ।

ददृशे च तथा तत्र नानारूपपतत्रिणः ।
मयूरां चितपक्षाश्च काककङ्कांश्च कोकिलान् ।। (50)
बकान् कामन्दकान् हंसान् कोयष्टीन् खञ्जरीटकान् ।
कुक्कुटान् काष्ठकूटांश्च खट्वाङ्गान् लुब्धकींस्तथा ॥ (51)
एत०ा०श्चान्यांश्च बहुशः पक्षिसङ्घान्मनोहरान् ॥ (57)

(मत्स्यपुराणम् - अध्यायः-117)(14)

हिमवत्पर्वते नानावन्यक्रूरमहामृगाः आसन् ।
श्वापदान् विविधाकारान् मृगांश्चैव महामृगान् ।
व्याघ्रान् केसरिणस्सिंहान् द्वीपिनश्शरभान् वृकान् ।। (58)
गोक्षीरेण सम्पूर्णा दहना चान्यत्र वा बहु ।। (69)

(मत्स्यपुराणम् - अध्यायः -117)(15)

तस्मिन नगे निर्मलोदक सरोवरनद्यः बहवः आसन् । हिमालयस्य कन्दराणि पदे पदे सुसेव्यान्यासन् । तत्र पंचयोजनपर्यन्तं हिमपातो नासीत् ।

देवीमुख्याः हिमवन्नगे सततं रमन्ते स्म । तत्रस्थाः फलवृक्षादयः तेषां अनुकूलाः आसन् । तत्र सदा उपगीतभ्रमराः आसन् । तत्र वानराः क्रीडन्ति स्म।

सोऽपश्यत् परमां प्रीतिमवाप वसुधाधिपः ।
सरांसि तंत्र दिव्यानि नद्यश्च विमलोदकाः ।। (70)
वानरैः क्रीडमानाश्च देशे देशे नराधिप ।
हिमपुञ्जकृतास्तत्र पूर्णबिम्ब समप्रभाः ।। (77)

(मत्स्यपुराणम् - अध्यायः - 117) (16)

उपसंहारः - एवं हिमवत्पर्वते वृक्षाः, पशवः, पक्षिणः, मुनयः, गन्धर्वादयः, लताः, गुल्मानि, सरोवराः, नद्यः इत्यादयः सर्वविधांशाः आसन् । तैस्सर्वैः समलङ्कृतः हिमाद्रिः सर्वेषां सर्वविधप्रयोजनकरः आसीत् । पूर्वोक्तमत्स्यपुराणस्थहिमवत्पर्वत-वर्णनेन तस्मिन् काले हिमालयपर्वतस्य बहुलप्रयोजनं ज्ञायते । अधुना वयं सर्वे तादृशहिमालयं परिरक्षेम ।

<u>पदान्तसूची</u>

1. श्रीमत्स्यमहापुराणम् - पृष्ठसंख्या उपोद्घातः -6, 7
2. तत्रैव - पृष्ठसंख्या - उपोद्घातः - 10
3. तत्रैव - प्रथमसम्पुटमु पृष्ठसंख्या - विषयसूचिका
4. तत्रैव - द्वितीयसम्पुटमु - पृष्ठसंख्या - विषयसूचिका
5. संस्कृतसाहित्यचरित्र - पृष्ठसंख्या - 225
6. कुमारसम्भवम् - पृष्ठसंख्या - 1, 2
7. रघुवंशम् - पृष्ठसंख्या - 131
8. श्रीमत्स्यमहापुराणम् - प्रथमसम्पुटमु - पृष्ठसंख्या - 409, 410
9. तत्रैव - पृष्ठसंख्या - 410
10. तत्रैव - पृष्ठसंख्या - 410
11. तत्रैव - पृष्ठसंख्या - 411 तः 413 पर्यन्तम्
12. तत्रैव - पृष्ठसंख्या - 413, 414
13. तत्रैव - पृष्ठसंख्या 414
14. तत्रैव - पृष्ठसंख्या - 415
15 तत्रैव - पृष्ठसंख्या - 415, 416.
16. तत्रैव - पृष्ठसंख्या - 416

<u>आधारग्रन्थसूची</u>

1.श्रीमत्स्यमहापुराणमु-पातूरि सीतारामाञ्जनेयुलु (प्रथमसम्पुटम्) श्रीवेङ्कटेश्वर आर्षभारति ट्रस्ट – हैदराबाद्, 1986.

2. श्रीमत्स्यमहापुराणम् -पातूर सीतारामाञ्जनेयुलु (द्वितीयसम्पुटमु) श्रीवेङ्कटेश्वर आर्षभारति ट्रस्ट्-हैदराबाद्, 1987.

3.संस्कृत साहित्यचरित्र - डा. मुदिगंटि. गोपालरेड्डि, डा. मुदिगंटि. सुजातारेड्डि, पोट्टि श्रीरामुलु तेलुगुविश्वविद्यालयम् – हैदराबाद् 8 मुद्रण – 2021 (ISBN: 81-86073-313-7)

4. कुमारसम्भवम् - श्री. पं. प्रद्युम्न पाण्डेयः चौखम्बा विद्याभवन-वाराणसी पुनर्मुद्रित - 2019.

5.रघुवंशम्-डॉ.श्रीकृष्णमणि त्रिपाठी -चौखम्बा सुरभारती प्रकाशन-वाराणसी पुनर्मुद्रित – 2022. (ISBN: 978-93-83721-44-3)